वास्तुयज्ञके । दीक्षायामाह्निके कृत्ये क्षेत्रे श्रीपुरुषोत्तमे । सामश्राद्धे यजुःश्राद्धे मूढ़हत्वविचारणे । इत्यष्टाविंशतिस्थाने तत्त्वं वक्ष्यामि यत्नतः" । [अष्टकोणादयोऽप्यत्र ।

**अष्टार** त्रि० अष्टौ अरा इव कोणा यस्य । अष्टकोणे । अष्टा-

**अष्टारचक्रवत्** पु० अष्टारमष्टकोणं चक्रमस्त्यस्य मतुप् मस्य वः । अष्टकोणचक्रधारके जिनभेदे ।

**अष्टाल** पु० घोटकदेशभेदे अश्वशब्दे विवृतिः ।

**अष्टावक्र** पु० अष्टकृत्वोवक्रः कृत्वौ संख्या सुजर्थपरा पृ०दीर्घः। ऋषिभेदे स च उद्दालकशिष्यकहोडपुत्रः। तदुत्पत्तिकथा भा० व० १३२ अ० ।"उद्दालकस्य नियतः शिष्य एको नाम्ना कहोड इति विश्रुतोऽभूत् । शुश्रूषुराचार्य्यवशानुवर्त्ती दीर्घं कालं सोऽध्ययनञ्चकार । तं वै विप्रः पर्य्यचरत् स शिष्यस्ताञ्च ज्ञात्वा परिचर्य्यां गुरुः सः । तस्मै प्रादात् सद्य एव श्रुतञ्च भार्य्याञ्च वै दुहितरं स्वां सुजाताम् । तस्यां गर्भः समभवदग्निकल्पः सोऽधीयानं पितरञ्चाप्युवाच । सर्व्वां रात्रिमध्ययनं करोषि नेदं पितः सम्यगिवोपवर्त्तते । वेदान् साङ्गान् सर्व्वशास्त्रैरुपेतानधीतवानस्मि तव प्रसादात् । इहैव गर्भे तेन पितर्ब्रवीमि नेदं त्वत्तः सम्यगिवोपवर्त्तते । उपालब्धः शिष्यमध्ये महर्षिः स तं कोपादुदरस्थं शशाप । यस्मात् कुक्षौ वर्त्तमानो ब्रवीषि तस्माद्वक्रो भवितास्यष्टकृत्वः । स वै तथा वक्र एवाभ्यजायदष्टावक्रः प्रथितो वै महर्षिः"। सचाष्टावक्रसंहिताकारी

**अष्टावक्रीय** न० अष्टावक्रमधिकृत्य कृतः ग्रन्थः छ । भा० व० प० १३२ अध्यायमारभ्य अध्यायत्रयात्मके ग्रन्थभेदे यत्र वादेन वन्दिनं जित्वाऽष्टावक्रेण वन्दिपराजितं तेनैव जलेनिमज्जितं पितरं कहोड़नामानं मुनिं मोचयामास तेन प्रसन्नेन पित्रा तस्याष्टवक्रतादूरीकरणेन सौम्याकारता कृतेति वर्णितम् ।

**अष्टि** स्त्री अश्यते भुज्यते क्षिप्यते अस-क्तिन् पृषो० षत्वम् । (आटि) इति ख्याते १वीजे, २षोडशाक्षरपादके छन्दोभेदे च । "अष्ट्यत्यष्टी ततः स्मृते" वृ० र० । अक्ष-व्याप्तौ-क्तिन् । ३व्याप्तौ । अश-करणे क्तिन् । ४भोगसाधने देहे "शतशारदीया युष्मान् न जरदष्टिर्य्यथासम्" यजु० ३४,५२। जरती अष्टिः शरीरं यस्य "वेददी०अष्टेः षोड़शाक्षरपादत्वेन तत्संख्यासाम्यात् ५षोड़शसंख्यायां ६तत्संख्येये च । "समाद्रिपञ्चाङ्कदिने विवाहाद्वधूप्रवेशोऽष्टिदिनान्तराले । इति मुहू० चि० फलाभ्यन्तरस्थास्थितुल्यकठिनांशवाची तु थकारमध्यः अष्ठिशब्दएव ज्यायान् अस्थितुल्यतया तस्याष्ठित्वम् । तकारयुक्तः पाठस्तु असमीचीनः । रसमयस्य त्वगष्ठ्यादेरभावात् फलमेव रसं पिबतेति" भाग०टी०श्रीधरः ।

**अष्ट्रा** स्त्री अश्यते चाल्यतेऽनया अक्ष-करणे ष्ट्रन् । १प्रतोदे "शुनमष्ट्रामुदिङ्गय" ऋ०४,५७,४ । "अष्ट्रांप्रतोदम्" भा० २रथचक्रावयवभेदे च । "अष्ट्रां पूषा शिथिरामुद्वरीवृजत्" ऋ० ६,५८,२ । "अष्ट्रामारामिति" भा० ।

**अष्ठीला** स्त्री अष्ठिस्तत्तुल्यकठिनांशस्थानं रा-क रस्य लः दीर्घः "आध्मापयन् वस्तिगुदं रुद्ध्वा वातश्चलोन्नताम्" । कुर्य्यात्तीव्रार्त्तिमष्ठीलां मूत्रस्य मार्गरोधिनीमिति वैद्यकोक्तलक्षणयुक्ते वातजन्ये १व्याधिभेदे । २मूत्राघातरोगभेदे सुश्रुतः तल्लक्षणादि तत्र यथा "अथातो मूत्राघातप्रतिषेधमध्यायं व्याख्यास्यामः वातकुण्डलिकाष्ठीला वातवस्तिस्तथैव च" द्वादशभेदानभिधाय लक्षितं यथा "शकृण्मार्गस्य वस्तेश्च वायुरन्तरमाश्रितः । अष्ठीलावद्घनं ग्रन्थिं करोत्यचलमुन्नतम् । विण्मूत्रानिलसङ्गश्च तत्राध्मानं च जायते । वेदना जायते वस्तौ वाताष्ठीलेति तां विदुः" । ३वर्त्तुलाकारे पाषाणखण्डे च । तदाकारत्वेन वाताष्ठीलाया अपि तथात्वम् "ततोजज्ञे मांसपेशी लोहाष्ठीलेव संहता" भा०आ० प०११५ अध्या० । मूत्राघाते क्लीवत्वमपि भेदनं दीपनं हृद्यमानाह्याष्ठीलनुल्लघु" सुश्रुतः ।

**अष्ठीवत्** पु० नास्ति अतिशयितमस्थि यस्मिन् मतुप् पृषो० नि० । (आंटु) इति ख्याते जान्वोः सन्धिस्थाने । अष्ठीवन्तौ परिकुल्फौ च देहे" ऋ०७,५०,२, ऊरुभ्यां ते अष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्याम्" अथ०१०,१६३,४, अस्य ऊरुपूर्व्वपदत्वे द्वन्द्वे १अदन्तता ऊर्व्वष्ठीवं न० । "चत्वार्य्यूर्व्वष्ठीवानि" शत०ब्रा० । २ष्ठीवद्विन्ने त्रि० ।

**अस** दीप्तौ अक०ग्रहणे गतौ च सक०भ्वादि०उभ०सेट् । असति ते आसीत् आसिष्ट । "लावण्य उत्पाद्य इवास यत्नः" कुमा० ।

**अस** विद्यमानतायाम् अदा०अक०पर०सेट् । अस्ति स्तः सन्ति असि स्थःस्थ अस्मि स्वः स्मः । स्यात् स्युः । अस्तु स्ताम् सन्तु एधि-असानि । आसीत् । अस्य असार्व्वधातुके भ्वादेशः । तेन भूधातुवद्रूपम् । विद्यमानता च काल संबन्धधारणं तदुक्तं हरिणा "आत्मानमात्मना बिभ्रदस्तीव्यपदिश्यते । अन्तर्भावाच्च तेनासौ कर्म्मणा न सकर्म्मकः" "अस्त्युत्तरस्यां दिशि देवतात्मा" कुमा० यज्ञावहासार्थमसत्कृतोऽसि गीता" "प्रपन्नोऽस्मि स्वैरं रतिरसमहानन्दनिरताम्" श्यामास्तवः । "स्याद्वा संख्यावतोऽर्थस्य समुदायोऽभिधायकः" फणिभा० "स्यातामसित्रे मित्रे च सहज